# ॥ નારકિકૃતશ્રીનૃસિંહસ્તોત્રમ્ ॥

.. nArakikRRitashrInRRisiMhastotram ..

sanskritdocuments.org

August 20, 2017

# .. nArakikRRitashrInRRisiMhastotram ..

# ॥ નારકિકૃતશ્રીનૃસિંહસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : nArakikRRitashrInRRisiMhastotram

File name : nArakikRRitashrInRRisiMhastotram.itx

Category : vishhnu

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ નારકિકૃતશ્રીનૃસિંહસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

ઓન્નમો ભગવતે તસ્મૈ કેશવાય મહાત્મને ।
યન્નામકીર્તનાત્સદ્યો નરકાગ્નિઃ પ્રશામ્યતિ ॥ ૧॥

ભક્તપ્રિયાય દેવાય પરસ્મૈ હરયે નમઃ ।
લોકનાથાય શાન્તાય યજ્ઞેશાયાદિમૂર્તયે ॥ ૨॥

અનન્તાયાપ્રમેયાય નરસિંહાય તે નમઃ ।
નારાયણાય ગુરવે શઙ્ખચક્રગદાભૃતે ॥ ૩॥

વેદપ્રિયાય મહતે વિક્રમાય નમો નમઃ ।
વરાહાયાપ્રતર્ક્યાય વેદાઙ્ગાય મહીભૃતે ॥ ૪॥

નમો દ્યુતિમતે નિત્યં બ્રાહ્મણાય નમો નમઃ ।
વામનાય બહુજ્ઞાય વેદવેદાઙ્ગધારિણે ॥ ૫॥

બલિબન્ધનદત્તાય વેદપાલાય તે નમઃ ।
વિષ્ણવે સુરનાથાય વ્યાપિને પરમાત્મને ॥ ૬॥

ચતુર્ભુજાય શુદ્ધાય શુદ્ધદ્રવ્યાય તે નમઃ ।
જામદગ્ન્યાય રામાય દુષ્ટક્ષત્રાન્તકારણે ॥ ૭॥

રામાય રાવણાન્તકાય નમસ્તુભ્યં મહાત્મને ।
અસ્માનુદ્ધર ગોવિન્દ પૂતિગન્ધિન્નમોઽસ્તુ તે ॥ ૮॥

સ્તોત્રમેતત્પઠેદ્યસ્તુ નિરયાન્મુચ્યતે ચ સઃ ।
નાસ્ત્યત્ર સંશયઃ સ્વલ્પઃ પ્રત્યહં પાઠમાચરેત્ ॥ ૯॥

ઇતિ શ્રીનૃસિંહપુરાણે નારકિકૃતં શ્રીનૃસિંહસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*